प्रवेश सं० ____ विषय वेद:

नाम कर्मप्रदीपः (छन्दोगपरिशिष्ट) कर्ता गोभिलाचार्य

पत्र सं० ____ पत्र संख्या (पत्रों) 22. पंक्ति सं० (पृष्ठे) १०.

श्लोक सं० ____

आकार ७.७" x ४.२" लिपि दे.ना. आधार का.

विशेष विवरण —

आ. ७७/७८.

004262

८

श्रीगणेशायनमः [illegible] श्रीगणेशायनम

[illegible]

[illegible]

कै। ख्वै। लो। गो। ठै। घै। बै। लौ। लै। लै।

[illegible] रामदेवरघुइंदु [illegible]

[illegible]

पदनपोथी

श्री गणेशाय नमः ॥ ॐ श्री सामवेदाय ॥ अथातो गोभिलो
क्तानामन्येषांचैव कर्मणां ॥ अस्पष्टानां विधिं संम्यक् दर्श
यिष्ये प्रदीपवत् ॥१॥ त्रिवृदूर्द्धवृतं कार्यं तंतुत्रयमधोवृतं ॥
त्रिवृच्चोपवीतं स्यात्तस्यैको ग्रंथिरिष्यते ॥२॥ पृष्ठवंशे च
नाभ्यांच धृतं यद्विंदते कटिं ॥ तद्धार्यमुपवीतं स्यान्नातिलंबं न
चोछ्रितं ॥३॥ सदोपवीतिना भाव्यं सदाबद्धशिखेन च ॥ विशि
खो व्युपवीतश्च यत्करोति न तत्कृतं ॥४॥ त्रिःप्राश्यापो द्विरुन्मृज्य
मुखमेतान्युपस्पृशेत् ॥ आस्यनासाक्षिकर्णं च नाभिवक्षः १
शिरोंसकान् ॥५॥ अंगुष्ठेन प्रदेशिन्या घ्राणं चैवमुपस्पृशेत् ॥

अंगुष्ठानामिकाभ्यांच चक्षुःश्रोत्रे पुनःपुनः ॥६॥ कनिष्ठांगुष्ठयोर्नो
भिं च हृदयं तु तलेनवै ॥ सर्वाभिस्तु शिरः पश्चाद्बाहू चाग्रेण संस्पृ
शेत् ॥७॥ यत्रोपदिश्यते कर्म कर्तुरंगं न तूच्यते ॥ दक्षिणस्तत्र विज्ञे
यः कर्मणां पारगः करः ॥८॥ यत्र दिग्नियमो न स्याज्जपहोमादिक
र्मसु ॥ तिस्रस्तत्र दिशः प्रोक्ता ऐंद्री सोम्यापराजिता ॥९॥ तिष्ठन्नासी
नः प्रह्वो वा [illegible] नियमो यत्र नेदृशः ॥ तदासीनेन कर्त
व्यं न प्रह्वेण न तिष्ठता ॥१०॥ गौरी पद्मा शची मेधा सावित्री विजया
जया ॥ देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥११॥ धृतिः पुष्टिस्त
था तुष्टिरात्मदेवतया सह ॥ गणेशेनाधिका ह्येता वृद्धौ पूज्याश्च

Indira Gandhi National
Centre for the Arts

तुद्देश॥१२॥कर्मादिषु तु सर्वेषु मातरः सगणाधिपाः॥पूजनीयाः प्रय
त्नेन पूजिताः पूजयंति ताः॥१३॥प्रतिमासु च शुभ्रासु लिखित्वा वा प
टादिषु॥अपि वाक्षतपुंजेषु नैवेद्यैश्च पृथग्विधैः॥१४॥कुड्यल
ग्नां वसोर्द्धारां सप्तधारां घृतेन तु॥कारयेत्पंच धारां वा नातिनीचां
न चोच्छ्रितां॥१५॥आयुष्याणि च शांत्यर्थं जप्त्वा तत्र समाहितः॥ष
ड्भ्यः पितृभ्यस्तदनु भक्त्या श्राद्धमुपक्रमेत्॥१६॥अनिष्ट्वा तु पितॄ
न्श्राद्धे न कुर्यात्कर्म वैदिकं॥तत्रापि मातरः पूर्वं पूजनीयाः प्रयत्न
तः॥१७॥वसिष्ठोक्तो विधिः कृत्स्नो द्रष्टव्योऽत्र निरामिषः॥अतः परं प्रव २
क्ष्यामि विशेष इह यो भवेत्॥१८॥प्रातरामंत्रितान्विप्रान्युग्मा



नुभयतस्तथा॥उपवेश्य कुशान्दद्यादृजुनैव हि पाणिना॥१९॥ह
रिता यज्ञिया दर्भाः पीतकाः पाकयज्ञिकाः॥समूलाः पितृदैवत्याः क
ल्माषा वैश्वदेविकाः॥२०॥हरिता वै सपिंजूलाः शुष्काः स्निग्धाः स
माहिताः॥रत्निमात्राः प्रमाणेन पितृतीर्थेन संस्कृताः॥२१॥पिंडार्थं
२ ये स्तृता दर्भास्तर्पणार्थं तथैव च॥धृतैः कृते च विण्मूत्रे त्यागस्ते
षां विधीयते॥२२॥दक्षिणं पातयेज्जानु देवान्परिचरन्सदा॥पात
येदितरज्जानु पितॄन्परिचरन्नपि॥२३॥निपातो न हि सव्यस्य जा
नुनो विद्यते क्वचित्॥सदा परिचरेद्भक्त्या पितॄनप्यत्र दैववत्॥२४
॥पितृभ्य इति दत्तेषु उपवेश्य कुशेषु तान्॥गोत्रनामभिरामंत्र्य

Indira Gandhi National
Centre for the Arts

पिद्दूनथैव दापयेत॥२५॥नाचापसव्यकरणंनपित्र्यंतीर्थमिष्यते
॥पात्राणांपूरणादीनिदैवेनैव हि कारयेत॥२६॥ज्येष्ठोत्तरकरा
न्युग्मान्करागाग्रपवित्रकान्॥कृत्वार्घ्यंसंप्रदातव्यंनैकेकस्या
त्र दीयते॥२७॥अनंतर्गर्भिणंसाग्रंकौशंद्विदलमेवच॥प्रादेश
मात्रंविज्ञेयंपवित्रंयत्रकुत्रचित॥२८॥एतदेव हि पिंजूल्यालक्ष
णंसमुदाहृतं॥आज्यस्योत्पवनार्थंय तदप्येतावदेवतु॥२९॥
एतत्प्रमाणमेवैकेकौशीमप्यर्द्धमंजरी॥शुष्कावाशीर्णकुसुमापिंजू
लीपरिचक्षते॥३०॥पित्र्यमंत्रानुद्रवणआत्मालंभेधमेक्षणे॥अधो
वायुसमुत्सर्गप्रहासेनृतभाषणे॥३१॥मार्जारमूषकस्पर्शआकुष्टे
क्रोधसंभवे॥निमित्तेष्वेषुसर्वत्रकर्मकुर्वन्नपःस्पृशेत॥३२॥अक्रि २

यात्रिविधाप्रोक्ताविद्वद्भिःकर्मकारिणां॥अक्रियाचपरोक्ताचतृतीयाचा
यथाक्रिया॥३३॥स्वशाखाश्रयमुत्सृज्यपरशाखाश्रयंचयः॥कर्तुमिच्छ
तिदुर्मेधामोघंतत्तस्यचेष्टितं॥३४॥यन्नाम्नातंस्वशाखायांपरोक्तमवि
रोधिच॥विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्मवत॥३५॥प्रवृत्तमन्यथा
कुर्याद्यदिमोहात्कथंचन॥यतस्तदन्यथाभूतंततएवसमापयेत॥३६
॥समाप्तंयदिजानीयान्मयैतदयथाकृतं॥तावदेवपुनःकुर्यान्नावृ
त्तिःसर्वकर्मणः॥३७॥प्रधानस्याक्रियायत्रसांगंतक्रियतेपुनः॥तदंग
स्याक्रियायांतुनावृत्तिर्नैवतत्क्रिया॥३८॥मधुमध्वितियस्तत्रत्रिर्जपोऽशि
तुमिच्छतां॥गायत्र्यनंतरंसोत्रमधुमंत्रविवर्जितः॥३९॥नचाश्नत्सुजपे
दन्नकदाचित्पितृसंहितां॥अन्यएवजपःकार्यःसोमसामादिकःशु

Indira Gandhi National
Centre for the Arts

नः॥७०॥यस्तत्रप्रकरोऽन्नस्यतिलवद्यववत्तथा॥उच्छिष्टसन्निधौसोन्न
ष्टेतेषुविपरीतकः॥७१॥संपन्नमितितृप्ताःस्थप्रश्नस्थानेविधीयते॥सु
संपन्नमितिप्रोक्तेशेषमन्नंनिवेदयेत्॥७२॥प्रागग्रेष्वथदर्भेषुआद्यमामं
त्र्यपूर्ववत्॥अपःक्षिपेन्मूलदेशेऽवनेनिक्ष्वेतिपात्रतः॥७३॥द्वितीयं
चतृतीयंचमध्यदेशाग्रदेशयोः॥मातामहप्रभृतींस्तुतेषामेववा
मतः॥७४॥सर्वस्मादन्नमुद्धृत्यव्यंजनैरुपसिच्यच॥संयोज्ययवकर्क
न्धुदधिभिःप्राङ्मुखस्ततः॥७५॥अवनेजनवत्पिंडान्दत्वाबिल्वप्रमा
णकान्॥तत्पात्रक्षालनेनाथपुनरप्यवनेजयेत्॥७६॥श्री॥३॥उत्तरो
त्तरदानेनपिंडानामुत्तरोत्तरः॥भवेदधश्चाधराणामधरःश्राद्धकर्म
णि॥७७॥तस्माच्छ्राद्धेषुसर्वेषुवृद्धिमत्स्वितरेषुच॥मूलमध्याग्रद

शाखीदृसकृदभ्युनिर्वपेत्॥७८॥गंधादीन्निक्षिपेत्तूष्णींततआचा
मयेद्द्विजान्॥अन्यत्राप्येषएवस्याद्यवादिरहितोविधिः॥७९॥द
क्षिणाप्लवनेदेशेदक्षिणाभिमुखस्यच॥दक्षिणाग्रेषुदर्भेषुएषोऽ
न्यत्रविधिःस्मृतः॥८०॥अथाग्रभूमिमासिंचेत्सुसंप्रोक्षितमस्त्विति
॥शिवाआपःसंत्वितिचयुग्मानेवोदकेनच॥८१॥सौमनस्यमस्त्वितिच
पुष्पदानमनंतरं॥अक्षतंचारिष्टंचास्त्वित्यक्षतान्प्रतिपादयेत्॥८२॥अ
र्घ्य क्षय्योदकदानंवा[illegible]दानवदिष्यते॥षष्ठ्यैवनित्यंतत्कुर्यान्नचतुर्थ्याक
दाचन॥८३॥अर्घेक्षय्योदकेचैवपिंडदानेऽवनेजने॥तंत्रस्यतुनिवृ
त्तिःस्यात्स्वधावाचनएवच॥८४॥प्रार्थनासुप्रतिप्रोक्तेसर्वास्ववद्विजोत्त
मैः॥पवित्रांतर्हितान्पिंडान्सिंचेदुत्तानपात्रकृत्॥८५॥युग्मानेवस्व

Indira Gandhi National
Centre for the Arts

स्त्रिवा चेद्गुरुषप्रगृह्य सदा॥ कृत्वा धुर्यस्यापिण्डस्य प्रणम्यानुज्ञान्न
तः॥५६॥ एष श्राद्धविधिः कृत्स्न उक्तः संक्षेपतो मया॥ ये विदन्ति मुह्य
न्ति श्राद्धकर्मसु ते क्वचित्॥५७॥ इदं शास्त्रं च गृह्यं च परिसंख्यानमेव
च॥ वसिष्ठोक्तं च यो वेद स श्राद्धं वेद नेतरः॥५८॥ असपिण्ड्यानि क
र्माणि क्रियेरन्कर्मकारिभिः॥ प्रतिप्रयोगं नैताः स्युर्मातरः श्राद्धमेव च
॥५९॥ आधाने होमयोश्चैव वैश्वदेवे तथैव च॥ बलिकर्मणि दर्शे च
पौर्णमासे तथैव च॥६०॥ नवयज्ञे च यज्ञज्ञा वदन्त्येवं मनीषिणः॥
एकमेव भवेच्छ्राद्धमेतेषु न पृथक्पृथक्॥६१॥ नाष्टकासु भवेच्छ्रा
द्धं न श्राद्धे श्राद्धमिष्यते॥ न सोष्यन्तीजातकर्मप्रोषितागतकर्मसु॥६२॥
विवाहादिः कर्मगणो य उक्तो गर्भाधानं पुंसवनादितः॥ विवाहादा ५

तर

वेकमेवात्र कुर्यान्न श्राद्धं नादौ कर्मणः कर्मणः स्यात्॥६३॥ प्रदो
षश्राद्धमेकं स्याद्गोनिष्क्रान्तप्रवेशयोः॥ न श्राद्धं युज्यते कर्तुं
प्रथमे पौष्टिके कर्मणि॥६४॥ हलाभियोगादिषु तु षट्कुर्यात्पृ
थक्पृथक्॥ प्रतिप्रयोगमप्येषामादावेकं तु कारयेत्॥६५॥ बृ
हत्पत्रकुडपश्वस्वस्त्यर्थं परिविष्यतोः॥ सूर्येन्दोः कर्मणीष्टे तु त
याः श्राद्धं न विद्यते॥६६॥ न दशाग्रंथिके नैव विषवद्दष्टकर्मणि॥
कृमिदष्टचिकित्सायां नैवशेषेषु विद्यते॥६७॥ गणशः क्रियमा
णेषु मातृभ्यः पूजनं सकृत्॥ सकृदेव भवेच्छ्राद्धमादौ न पृथ
गादिषु॥६८॥ यत्र यत्र भवेच्छ्राद्धं तत्र तत्र च मातरः॥ प्रासंगिकमि

Indira Gandhi National
Centre for the Arts

दं प्रोक्तमतः प्रवक्षतमुच्यते॥६९॥ श्रीः॥ ५॥ आधानकालेयेप्रोक्तास्त
थायाश्चाग्नियोनयः॥ तदाश्रयोग्निमादध्यादग्निमानग्रजोयदि॥७०॥
॥दाराधिगमनाधानेयः कुर्यादग्रजाग्रिमः॥ परिवेत्तासविज्ञेयः प
रिवित्तिस्तुपूर्वजः॥७१॥ परिवित्तिपरिवेत्तारौनरकंगच्छतोध्रुवं॥
अपिचीर्णप्रायश्चित्तौपादोनफलभागिनौ॥७२॥ देशांतरस्थक्ली
बैकवृषणानसहोदरान्॥ वेश्यातिसक्तपतितशूद्रतुल्यातिरोगि
णः॥७३॥ जडमूकांधबधिरकुब्जवामनकुंडकान्॥ अतिवृद्धान
भार्यांश्चकृषिसक्तान्नृपस्य च॥७४॥ धनवृद्धिप्रसक्तांश्च का
मतोकारिणस्तथा॥ कुलटोन्मत्तचोरांश्च परिविंदन्नदुष्यति॥७५॥
धनवार्धुषिकं राजसेवकं कर्मकं तथा॥ प्रोषितं च प्रतीक्षेत वर्ष ६

ग्गा२

त्रयमपिचरन्॥७६॥ प्रोषितं यदि शृण्वानस्य ह्यादं ते समाचरेत्॥ आ
गते तु पुनस्तस्मिन्पादं वा शुद्धये चरेत्॥७७॥ लक्षणे प्रागता यास्तु
प्रमाणं द्वादशांगुलं॥ तन्मूलसक्तायोदीचीतस्याएतन्नवांतरं॥७
८॥ उदक्संस्थायाः संलग्नाः शेषाः प्रादेशमात्रिकाः॥ सप्तसप्तांगुलान्य
स्यकुशेनैवसमुल्लिखेत्॥७९॥ मानक्रियायामुक्तायामनुक्तेमानक
र्त्तरि॥ मानकृद्यजमानः स्याद्विदुषामेषनिश्चयः॥८०॥ पुण्यमेवाद
धीताग्निंस हि सर्वैः प्रशस्यते॥ अनर्द्धुकत्वं यत्तस्य काम्यैस्तं नीयते श
मं॥८१॥ यस्य दत्ताभवेत्कन्यावाचासत्येनकेनचित्॥ सोऽन्त्यांसमिध
२ द्व साधास्यनादधीतैवनान्यथा॥८२॥ अन्नदेवतुसाकन्यापंचत्वं येदि

Indira Gandhi National
Centre for the Arts

गछति॥ नतथा व्रतलोपोस्य तेनैवान्याॅसमुद्वहेत॥८३॥ अथ चेन्नल
भेतान्यां याचमानोपि कन्यकां॥ तमग्निमात्मसात्कृत्वा क्षिप्रॅस्यादुत्त
राश्रमी॥८४॥ श्री॥ रुद्र॥ अश्वत्थोयः शमीगर्भः प्रशस्तोर्वीसमुद्भवः॥
तस्य या प्राङ्मुखी शाखा वोदीची वाद्र्ध्वगापि वा॥८५॥ अरणिस्तन्म
यी प्रोक्ता तन्मय्युत्तरारणिः॥ सारवद्दारवंचात्रमौवीतं स्नीच प्रशस्य
ते॥८६॥ सॅसक्तमूलो यः शम्याः स शमीगर्भ उच्यते॥ अलाभे त्व
शमीगर्भाद्धरेदेवाविलंबितः॥८७॥ चतुर्विंशतिरंगुष्ठादैर्घ्यं ८
षडपि पार्थिवं॥ चत्वार उच्छ्रयो मानमरण्योः परिकीर्तितं॥८८॥
अष्टांगुलः प्रमंथः स्याच्चात्रं स्याद्द्वादशांगुलं॥ उवीली द्वादशै ७

वस्याद्देतन्मंथनयंत्रकं॥८९॥ अंगुष्ठांगुलिमानंतु यत्रयत्रोपदि
श्यते॥ तत्रतत्र बृहत्पर्वग्रंथिभिर्मिनुयात्सदा॥९०॥ गोवालैः श
खगं ३ णसंमिश्रैस्त्रिवृद्वृत्तमनंशुकं॥ व्यामप्रमाणं नेत्रॅस्यात्प्रमथ्यस्ते
सर्ग ४ नपावकः॥९१॥ मूर्द्धाक्षिकर्णवक्त्राणि कंधराचापि पंचमी॥ अंगुष्ठमा
त्राण्येतानि द्व्यंगुष्ठं वक्ष उच्यते॥९२॥ अंगुष्ठमात्रॅहृदयं त्र्यंगुष्ठ
मुदरॅस्मृतं॥ एकांगुष्ठा कटिर्ज्ञेया द्वौ बस्तिर्द्वौ च गुह्यकं॥९३॥
ऊरूजंघे च पादौ च चतुस्त्र्येकैर्यथाक्रमं॥ अरण्यवयवा ह्येते या
ज्ञिकैः परिकीर्तिताः॥९४॥ यत्तद्गुह्यमिति प्रोक्तं देवयोनिस्तु सोच्यते
॥ अस्यां यो जायते वह्निः स कल्याणकृदुच्यते॥९५॥ अन्येषु ये तु मंथं

१६

तितेरागभयमाहुर्युः॥ प्रथमेमंथनेत्वेषनियमोनोत्तरेषुच॥ ९६॥ उ
त्तरारणिनिष्पन्नःप्रमंथःसर्वदाभवेत्॥ योनिसंकरदोषेणयुज्यते
ह्यन्यमंथनात्॥ ९७॥ आर्द्रासमुषिराचैवघूर्णांगीपाटितातथा॥ न
हितायजमानानामरणिश्चोत्तरारणिः॥ ९८॥ श्रीः॥ आपरिधायाह
तंवासःप्रावृत्यचयथाविधि॥ बिभृयात्प्राङ्मुखोयंत्रमावृतावक्ष्यमा
णया॥ ९९॥ चात्रबुध्नप्रमंथाग्रंगाढंकृत्वादिचक्षणः॥ कृत्वोत्तराग्रा
मरणिंतद्बुध्नमुपरिन्यसेत्॥ १००॥ चैत्रग्रकीलकाग्रस्तांमौर्वीलीमुद
गग्रगां॥ विष्टभ्याहारयथंत्रंनिष्कंपंप्रयतःशुचिः॥ १॥ विरुदंष्ट्राथने
त्रेणार्चत्रपत्न्याहृतांशुकाः॥ पूर्वमंथंत्यरण्यंतप्राच्याग्नेःस्याद्यथा ८

ग्र

चु

च्युतिः॥ २॥ जैनकयापिविनाकार्यमाधानंभार्ययाद्विजैः॥ अकृतंतद्विजा
नीयात्सर्वानांन्वारभंतियत्॥ ३॥ वर्मऽपैच्छेनवद्धीभिःसवर्णाभिस्त्वइ
न्मतः॥ कार्यमग्निच्युतेराभिःसाद्धीनिर्मंथनंपृथक्॥ ४॥ नात्रशूद्रीं
प्रयुंजीतनद्रोहद्वेषकारिणीं॥ नचैवाव्रतस्थांनाऽन्यपुंसाचसदस
गतां॥ ५॥ ततःशतमीतरापश्चादासामन्यतरापिवा॥ उपेतानीवान्यतमा
मंथेदग्निंनिकामतः॥ ६॥ जातस्यलक्षणंकृत्वातंप्रणीयसमिध्यच॥
आधायसमिधंचैवब्रह्माणंचोपवेशयेत्॥ ७॥ ततःपूर्णाहुतिंहुत्वा
सर्वतंत्रसमन्वितां॥ गांदद्याद्ब्रह्मवासर्वंतेब्रह्मणेवाससीतथा॥ ८॥ द
मपात्रमनादेशेऽद्वदश्यस्कवःस्मृतः॥ पाणिरेवतरस्मिंस्त्रुक्स्रुचेवात्र

दू

Indira Gandhi National
Centre for the Arts

तुहूयते॥९॥खादिरोवाथपालाशोवाद्विवितस्तिस्रुवःस्मृतः॥स्रुग्बाहुमा
त्राविज्ञेयाहस्तसुपरिमस्तया॥१०॥स्रुवाग्रेघ्राणवत्खातंद्व्यंगुष्ठंपरि
मंडलं॥स्रुचास्तु॥सर्वखातंसुषिरं॥स्रुचश्चाद्धषडंगुलंकुर्यात्
॥११॥प्राकृशौ॥श्चैवकुशैःकार्यःसंप्रमार्गोऽडुहूषता॥प्रतापनंचति
सानांप्रक्षालोष्णेनवारिणा॥१२॥प्रांचंप्रांचमुदग्ग्रंकुदगग्रं॥स
मीपतः॥तत्तथासादयेद्द्रव्यंयथाविनियुज्यते॥१३॥आज्यंद्रव्य
मनादेशेजुहोतिषुविधीयते॥मंत्रस्यदेवतायाश्चप्रजापतिरिति
स्थितिः॥१४॥नांगुष्ठादधिकाग्राह्यासमित्स्थूलतयाक्वचित्॥न
वियुक्तात्वचाचैवनसकीटानपाटिता॥१५॥प्रादेशान्नाधिकानोना ९

न चशाखाविशाखिका॥नसपर्णाननिर्वीर्याहोमेषुचविजानता॥१६॥
प्रादेशद्वयमिध्मस्यप्रमाणंपरिकीर्तितं॥एवंविधाभिरेवेहसमिद्भिः
सर्वकर्मसु॥१७॥समिधोष्टादशेध्मस्यप्रवदंतिमनीषिणः॥दर्शेच
पौर्णमासेचक्रियास्वन्यासुविंशतिः॥१८॥समिदादिषुहोमेषुमं
त्रदैवतवर्जिता॥पुरस्ताच्चोपरिष्टाच्चेंधनार्थंसमिद्भवेत्॥१९॥
इध्मोप्युपबर्हार्थमाचार्यैर्द्विराहुतिषुस्मृतः॥यत्रचास्यनिवृत्तिःस्या
त्तस्यपष्टीकरवाण्यहं॥२०॥अंगहोमसमित्तंत्रसोष्यंत्याख्येषुकर्मसु
२।३ ॥येषांचैतदुपर्युक्तंतेषुतत्सदृशेषुच॥२१॥प्रहस्तनंगादिविपद्दिल
होमादिकर्मणि॥कृताहुतिषुसर्वासुनैतन्निध्मोविधीयते॥२२॥श्रीः

Indira Gandhi National
Centre for the Arts

६

सं ॥२०॥ सूर्यस्तत्रैवतमप्राप्नेषट्त्रिंशद्भिः सदांगुलैः॥ प्रादुष्करणमग्नीनां
प्रातर्भासां च दर्शनात्॥२१॥ हस्तादूर्द्ध्वं रवियावद्गिरिं हित्वा न गच्छ
ति॥ तावद्धोमविधिः पुण्यो नात्येत्युदितहोमिनां॥२२॥ यावत्सम्यङ्न
भाव्यंते नभस्यृक्षाणि सर्वतः॥ न च लोहितिमापैति तावत्सायं च हू
यते॥२३॥ रजोनीहारधूमाभ्रवृक्षाग्रांतरिते रवौ॥ संध्यामुद्दिश्य जु
हुयाद्धुतमस्य न लुप्यते॥२४॥ न कुर्यात्क्षिप्रहोमेषु द्विजः परिसमूह
नं॥ वैरूपाक्षं च न जपेत्प्रपदं च विवर्जयेत्॥२५॥ पर्युक्षणं च सर्वत्र
कर्त्तव्यमदितेन्विति॥ अंते च वामदेव्यस्य गानं कुर्यादृचं त्रिवा॥२६॥ १०
क्षिप्रहोमक्ष्वपि न वेद्यां रूपंचदर्शने॥ वामदेव्यं गणेष्वंते बल्यं

ते वैश्वदेविके॥२७॥ यान्यधस्तरणाम्नानां लतेषु स्तरणं भवेत्॥ ए
ककार्यार्थसाध्यत्वात्परिधीनपि वर्जयेत्॥२८॥ बर्हिः पर्युक्षणं
चैव वामदेव्यजपस्तथा॥ कृत्वाहुतिषु सर्वासु त्रिकमेतन्न वि
द्यते॥२९॥ हविष्येषु यवा मुख्यास्तदनु व्रीहयः स्मृताः॥ माषको
द्रवगौरादीन्सर्वालाभेपि वर्जयेत्॥३०॥ पाण्याहुतिर्द्वादश
पर्वपूरिका कंसादिना चेत्स्रुवपूरमात्रिका॥ दैवेन तीर्थेन च
हूयते हविः स्वंगारिणि स्वर्चिषि तच्च पावके॥३१॥ योनर्चिषि जु
होत्यग्नौ व्यंगारिणि च मानवः॥ मंदाग्निरामयावी च दरिद्रश्च जा १२
यते॥३२॥ तस्मात्समिद्धे होतव्यं नासमिद्धे कदाचन॥ आरोग्य

Indira Gandhi National Centre for the Arts

मिछ्तायुष्यश्रियमाप्नोतिर्केपरां॥३५॥होतव्येचहुतेचैवपाणिसू
र्पास्यदर्विभिः॥नकुर्यादग्निधमनंकुर्याद्वाव्यंजनादिना॥३६॥
मुखेनैकेधमंत्यग्निंमुखाद्ध्येषोध्यजायते॥नाग्निंमुखेनेतिचय
ल्लौकिकेयोजयंतितत्॥३७॥श्री॥ॐ॥यथाहनितथाप्रातर्नि
त्यंस्नायादनातुरः॥दंतान्प्रक्षाल्यनद्यादौगृहेचेत्तदमंत्रवत्
स्वयद ॥३८॥नारदाद्युक्तवार्क्षेयमष्टांगुलमपाटितं॥सत्वचंदंतका
ष्ठंस्यात्तदग्रेणप्रधावयेत्॥३९॥उत्थायनेत्रेप्रक्षाल्यशुचि
र्भूत्वासमाहितः॥परिजप्यचमंत्रेणभक्षयेद्दंतधावनं॥४०॥
॥आयुर्बलंयशोवर्चःप्रजाःपशुवसूनिच॥ब्रह्मप्रज्ञांचमे ११

धांचत्वंनोधेहिवनस्पते॥४१॥मासद्वयंश्रावणादिसर्वानद्यो
रजस्वलाः॥तासुस्नानंनकुर्वीतवर्जयित्वासमुद्रगाः॥४२॥धनुः
३ स्री सहस्राण्यष्टौतुगतिर्यासांनविद्यते॥नतानदीशब्दवहागर्तास्ताः
परिकीर्तिताः॥४३॥उपाकर्मणिचोत्सर्गेप्रेतस्नानेतथैवच॥चं
द्रसूर्यग्रहेचैवरजोदोषोनविद्यते॥४४॥वेदाश्छंदांसिसर्वा
णिब्रह्माद्याश्चदिवौकसः॥जलार्थिनोऽथपितरोमरीच्याद्या
स्तथर्षयः॥४५॥उपाकर्मणिचोत्सर्गेस्नानार्थंब्रह्मवादिनः॥
यियासूननुगच्छंतिसंतुष्टाःस्वशरीरिणः॥४६॥समागमस्तु
यत्रैषांतत्रहत्यादयोमलाः॥नूनंसर्वेक्षयंयांतिकिमुतैकं

Indira Gandhi National
Centre for the Arts

नदीरज॥४७॥ऋषीणांसिच्यमानानामंतरालंसमाश्रियेत्॥
संपिबेद्यःशरीरेणपर्षन्मुक्तजलछटाः॥४८॥विद्यादीन्ब्राह्मणः
कामान्वरादीन्कन्यकाध्रुवं॥आमुष्मिकान्यपिसुखान्याप्नु मु ३
यान्नसंशयः॥४९॥अशुच्यशुचिनादत्तमाममृच्छकलादि
ना॥अनिर्गतदशाहास्थपेतास्थांसिभुंजते॥५०॥स्वर्धुन्यंभः
समानिस्युःसर्वाण्यंभांसिभूतले॥कूपस्थान्यपिसोमार्कग्र
हणेनात्रसंशयः॥५१॥श्री॥१॥ ॥इतिप्रथमःप्रपाठकः
॥ ॥ ॥अतऊर्ध्वंप्रवक्ष्यामिसंध्योपासनकंविधिं॥अनर्हःक
र्मणांविप्रःसंध्याहीनोयतःस्मृतः॥५२॥सव्यपाणौकुशान्कृ १२

त्वाकुर्यादाचमनक्रियां॥ह्रस्वाःप्रचरणीयस्युःकुशादीर्घास्तुबर्हि लि २
षः॥५३॥दर्भाःपवित्रमित्युक्तमतःसंध्यादिकर्मणि॥सव्यःसोप
ग्रहःकार्योदक्षिणःसपवित्रकः॥५४॥रक्षयेद्वारिणात्मानंपरिक्षि
प्यसमंततः॥शिरसोमार्जनंकुर्यात्कुशैःसोदकबिंदुभिः॥५५॥प्र
णवोभूर्भुवःस्वश्चसावित्रीचतृतीयका॥अब्दैवतस्त्र्यृचश्चैवच
तुर्थइतिमार्जनं॥५६॥भूराद्यास्तिस्रएवैतामहाव्याहृतयोव्य
याः॥महर्जनस्तपःसत्यंगायत्रीचशिरस्तथा॥५७॥आपोज्योती
रसोमृतंब्रह्मभूर्भुवःस्वरितिशिरः॥प्रतिप्रतीकंप्रणवमुच्चा
रयेदंतेचशिरसः॥५८॥एताएतांसहानेनतथैभिर्दशभिःस

Indira Gandhi National Centre for the Arts

द्ध॥त्रिर्जपेदायतःप्राणःप्राणायामःसउच्यते॥५९॥करेणोद्धृत्य
सज्यः सलिलंघ्राणमा[illegible]तत्रच॥जपेदनायतासुर्वात्रिःसकृद्वाऽघम
र्षणं॥६०॥उत्थायार्कंप्रतिप्रोहेत्त्रिकेणांजलिमंभसः॥उच्चित्रमि
त्यृग्द्वयेनोपतिष्ठेदनंतरं॥६१॥संध्याद्वयेऽप्युपस्थानमेत
दाहुर्मनीषिणः॥मध्येत्वृक्उपर्यस्यविभ्राडादीछयाजपेत्॥
द्व ॥६२॥तदसंसक्तपार्ष्णिर्वैकपादर्द्धपादपि॥कुर्यात्कृतांजलिर्वा
प्यूर्ध्वबाहुरथापिवा॥६३॥यत्रस्यात्कृच्छ्रभूयस्त्वंश्रेयसोपिमु
नीषिणः॥भूयस्त्वंब्रुवतेतत्रसच्छ्रद्धयाह्यवाप्यते॥६४॥ति
ष्ठेदासूर्यदर्शनात्पूर्वांमिथ्यातामपिशक्तितः॥आसीनो[illegible]च्यां १३
द्र ब्राः

न॥

त्यांसंध्यांपूर्वत्रिकंज[illegible]॥६५॥एतत्संध्यात्रयंप्रोक्तंब्राह्मण्यंय
त्रतिष्ठति॥यस्यनास्त्यादरस्तत्रनसब्राह्मणउच्यते॥६६॥सं
ध्यालोपस्यचकितःस्नानशीलश्चयःसदा॥तंदोषानोपसर्पंति स्य
गरुत्मंतमिवोरगाः॥६७॥श्रीः॥१॥वेदमादितआरभ्यशक्तितो ऽ
ऽहरहर्जपेत्॥उपतिष्ठेत्[illegible]तोरुद्रमथवाग्वावेदिकाजपात्॥
यवा ॥६८॥प्रथाद्भिस्तर्पयेद्देवान्सतिलाभिःपितॄनपि॥नामां
तेतर्पयामीत्यादावोमितिचकृवन्॥६९॥ब्रह्माणंविष्णुरुद्रप्र
जापतिंवेदांदेवांश्छंदांसिऋषीन्पुराणानाचार्यान्गंधर्वा
नितरान्मासंसंवत्सरंसावयवंदेवीरप्सरसोदेवानुगान्नागां गं १

Indira Gandhi National
Centre for the Arts

सागरान्पर्वतान्सरितो दिव्यान्मनुष्यानितरान्मनुष्यान्यक्षा
न्रक्षांसि सुपर्णान्पिशाचान्पृथिवीमोषधीः पशून्वनस्प
तीनन्भूतग्रामं चतुर्विधमित्यपवीत्यथ प्राचीनावीती यमं य
मपुरुषान्कव्यवालं नलं सोमं यममर्यमणमग्निष्वात्तान्सो
था मपीन्बर्हिषदो [illegible] थ्यवान् [illegible] पितॄन्मातामहादीनिति सकृत्प ह[illegible]न
च प्रतिपुरुषमभ्यस्य सङ्घ्येभ्य आचार्यश्वशुरपितृव्यमातुलांश्च पि
तृवंशमातृवंशीयांश्चान्यान् [illegible] उदकमर्हति तानपि [illegible] तर्पयामी स्त३
त्यथमवसानांजलिरर्थः श्लोकाः ॥७७॥ छायां यथेच्छे छरदात
पार्तः पयः पिपासुः क्षुधितोऽन्नमन्नं॥ बालो जनित्रीं जननीं च १४

बालं यथा स्त्रीपुरुषश्च योषां ॥७८॥ तथाभूतानि सर्वाणि
स्थावराणि चराणि च॥ विप्रादुदकमिच्छंति सर्वाण्युदयज्ञवि
दः ॥७९॥ तस्मात्सदैव कर्तव्यमकुर्वन्महतैनसा ॥ युज्यते ब्रा
ह्मणः कुर्वन्विश्वमेतद्धि भर्त्ति हि ॥८०॥ अल्पत्वाद्धोमकालस्य
बहुत्वात्स्नानकर्मणः ॥ प्रातर्न तनुयात्स्नानं होमलोपो हि ग
र्हितः ॥८१॥ श्रीः ॥१॥ पंचानामथ सत्राणां महतामुच्यते विधिः
॥ यैरिष्ट्वा सततं विप्रः प्राप्नुयात्सद्म शाश्वतं ॥८२॥ देवभूतपितृ
ब्रह्ममनुष्याणामनुक्रमात् ॥ महासत्राणि जानीयात्तएव देवस
होमखाः ॥८३॥ अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणं ॥ हो

Indira Gandhi National
Centre for the Arts

मोदेवो बलिर्भूतो नृयज्ञोऽतिथिपूजनं ॥८५॥ श्राद्धं वा पितृयज्ञः
स्यात्पित्र्यो बलिरथापि वा ॥ यश्च श्रुतिजपः प्रोक्तो ब्रह्मयज्ञः स वो
च्यते ॥८६॥ स चार्वाक्तर्पणात्कार्यः पश्चाद्वा प्रातराहुतेः ॥ वैश्वदे
त्र४ वावसाने वा नान्यत्रेति निमित्तकात् ॥८७॥ अप्येकमाशयद्वि
प्रं पितृयज्ञार्थसिद्धये ॥ अदैवं नास्ति चेदन्यो भोक्ता भोज्यमथा
पि वा ॥८८॥ अप्युद्धृत्य यथाशक्त्या किंचिदन्नं यथाविधि ॥ पि
तृभ्योऽथ मनुष्येभ्यो दद्यादहरहर्द्विजः ॥८९॥ पितृभ्य इदमि
येत्॥ त्युक्त्वा स्वधाकारमुदीर ॥ हंतकारं मनुष्येभ्यस्तदर्द्धे नि
नयेदपः ॥९०॥ ऋषिभिर्द्विरशनमुक्तं विप्राणां मर्त्यवासिनां १५

नित्यं ॥ अह्नि तथा च तमस्विन्यां सार्द्धप्रथमयामांतः ॥९१॥ सायं
प्रातर्वैश्वदेवः कर्त्तव्यो बलिकर्म च ॥ अनश्नतापि सततमन्यथा
किल्बिषी भवेत् ॥९२॥ अमुष्मै नम इत्येवं बलिदानं विधीयते ॥
प्रमाणं बलिदानप्रदानार्थं नमस्कारः कृतो यतः ॥९३॥ स्वाहाकार
वषट्कारनमस्कारा दिवौकसां ॥ स्वधाकारः पितृणां च हंतका
रो नृणां मतः ॥९४॥ स्वधाकारेण निनयेत्पित्र्यं बलयो भवंति
महामार्जारश्रवणप्रमाणतः ॥ एकत्र चेद्विनष्टा भवंतीतर
तरमसंसक्ताश्च ॥९६॥ श्री ॥३॥ अथ तद्विन्यासो बुद्धिपि
ण्डानि वोत्तरोत्तराः चतुरो बलीन्निदध्यात् ॥ पृथिव्यैवाय
बलिमतः सदा तदप्येकेन नमस्कारं कुर्वतो नेति गौतमः ॥९५॥ नवराद्यं

Indira Gandhi National Centre for the Arts

मोदेवो बलिर्भूतो नृयज्ञोऽतिथिपूजनं ॥८५॥ श्राद्धं वा पितृयज्ञः
स्यात्पित्र्यो बलिरथापि वा ॥ यश्च श्रुतिजपः प्रोक्तो ब्रह्मयज्ञः स वो
च्यते ॥८६॥ स चार्वाक्तर्पणात्कार्यः पश्चाद्वा प्रातराहुतेः ॥ वैश्वदे
त्र४ वावसाने वा नान्यत्रैमित्तिकात् ॥८७॥ अप्येकमाशयेद्वि
प्रं पितृयज्ञार्थसिद्धये ॥ अदैवं नास्ति चेदन्यो भोक्ता भोज्यमथा
पि वा ॥८८॥ अप्युद्धृत्य यथाशक्त्या किंचिदन्नं यथाविधि ॥ पि
तृभ्योऽथ मनुष्येभ्यो दद्यादहरहर्द्विजे ॥८९॥ पितृभ्यइदमि
येत्॥ त्युक्त्वा स्वधाकारमुदीर ॥ हंतकारं मनुष्येभ्यस्तदर्द्धं नि
नयेदपः ॥९०॥ ऋषिभिर्द्विरशनमुक्तं विप्राणां मर्त्यवासिना १५

नित्यं ॥ अह्नि तथा च तमस्विन्यां सार्द्धप्रथमयामतः ॥९१॥ सायं
प्रातर्वैश्वदेवः कर्त्तव्यो बलिकर्म च ॥ अनश्नतापि सततमन्यथा
किल्बिषी भवेत् ॥९२॥ अमुष्मै नम इत्येवं बलिदानं विधीयते ॥
प्रमाणं बलिदानप्रदानार्थं नमस्कारः कृतो यतः ॥९३॥ स्वाहाकार
वषट्कारनमस्कारा दिवौकसां ॥ स्वधाकारः पितॄणां च हंतका
रो नृणां मतः ॥९४॥ स्वधाकारेण निनयेत्पित्र्यं बलयो भवंति
महामार्जारश्रवणप्रमाणतः ॥ एकत्र चेद्विनष्टा भवंतीतरे
तरमसंसक्ताश्च ॥९६॥ श्री ॥ ३ ॥ अथ तद्भिन्यासो वृद्धिपि
ण्डानि वोत्तरोत्तरा८श्चतुरो बलीन्निदध्यात् पृथिव्यै वाय
बलिमतः सदा तदप्येकेन मस्कारं कुर्वतो नेति गौतमः ॥९५ना वराह्यां

Indira Gandhi National Centre for the Arts

वेविश्वेभ्योदेवेभ्यः प्रजापतयइतिसद्यतएतेषामेवैकैकस्यै
केकमष्टौ वृषस्विनस्पतिभ्यश्चाकाशायकामायेत्येतेषां
मपिमन्यवइंद्रायवासुकयेब्रह्मणइत्येतेषामपिरक्षोजने
भ्यइतिसर्वेषांदक्षिणतःपितृभ्यइतिचतुर्दशानित्याश्चास
स्यापवृत्तयःकाम्याःसर्वेषामुभयतोऽद्भिःपरिषेकःपिंडव
च्चपश्चिमाप्रतिपत्तिः॥२०॥नस्यात्तांकाम्यसामान्येऽनुदाति
बलिकर्मणि॥पूर्वंनित्यविशेषोक्तेऽनुदातिबलिकर्मणः
॥२१॥कामसंतम्भवेयात्तांस्तुमध्येकदाचन॥नैकस्मिन्क
र्मणितत्तेकर्मान्यतायतेयतः॥२२॥अग्न्यादिर्गौतमाद्युक्तो १६

अनंबा होतर्भिकुलाऊवामंत्रश्च शाकलैः॥भूतेभ्यश्चबलिंदद्यात्ततोऽन्नीयाच्चवन्निमा न्नाा४
होमःशाकलएवच॥अनाहिताग्नेरप्येषयुज्यतेबलिभिःसह॥
॥४॥स्पृष्ट्वापाणीवीक्ष्यमाणोग्निंलतांजलिपुटस्ततः॥वामदेव्य
जपात्पूर्वंप्रार्थयेद्द्रविणोदसं॥५॥आरोग्यमायुरैश्वर्यंधीधृतिः
शंबलंयशः॥ओजोवर्चःपशून्वीर्यंब्रह्मब्राह्मण्यमेवच॥६॥
सौभाग्यंकर्मसिद्धिंचकुलज्यैष्ठ्यंसुकर्तृतां॥सर्वमेतत्सर्वसा
क्षिन्द्रविणोदारिरीहिनः॥७॥नब्रह्मयज्ञादधिकोस्तियज्ञोनत
त्प्रदानात्परमस्तिदानं॥सर्वेऽन्तवंतःक्रतवःसदानानान्ताद्दृष्टंश्च
श्चिद्दस्यछिकस्य॥८॥ऋचःपठन्मधुपयःकुल्याभिस्तर्पयेत्सुरान्॥
घृतामृतौघकुल्याभिर्यजूंष्यपिपठन्सदा॥९॥सामान्यपिपठन्स

Indira Gandhi National
Centre for the Arts

मघृतकुल्याभिरन्वहं॥मेदःकुल्याभिरपिचाथर्वांगिरसःपठन्
॥१०॥मांसक्षीरौदनमधुकुल्याभिस्तर्पयेत् [illegible] ॥वाकोवाक्यंपठन्
पुराणानीतिहासानिचान्वहं॥११॥ऋगादीनामन्यतमंतेषां
शक्तितोऽन्वहं॥पठन्मध्वाद्यैकुल्याभिःपितॄनपिचतर्पयेत्॥
॥१२॥तेतृप्तास्तर्पयंत्येनंजीवंतंप्रेतमेवच॥कामचारीचभव
तिसर्वेषुसुरसद्मसु॥१३॥गुर्वप्येनोनतंस्पृशेत्पंक्तिंचैवपु
नातिसः॥यंयंक्रतुंचपठतिफलंभाक्तस्यतस्यच॥१४॥वसुपूर्
णांवसुमतींविद्वान्फलमाप्नुयात्॥ब्रह्मयज्ञादपिब्रह्मदानमे
वातिरिच्यते॥१५॥तत्तदद्भिःसमाप्नोतिब्रह्मलोकमविच्युतः॥१६॥ १७

॥श्रीः॥ ७॥ब्राह्मणेदक्षिणादेयायत्रयापरिकीर्तिता॥१६॥कर्मान्तेनु
च्यमानापिपूर्णपात्रादिकाभवेत्॥॥यावताबहुभोक्तुस्तृप्तिः
पूर्णेनविद्यते॥१७॥नावरार्ध्यमतःकुर्यात्पूर्णपात्रमितिस्थितिः॥ति
दद्याद्धोत्रमन्यश्चेद्दक्षिणार्धहरोभवेत्॥१८॥स्वयंचेदुभयंकुर्या
दन्यस्मैप्रतिपादयेत्॥कुलर्त्विजमधीयानंसन्निकृष्टंतथागु रुं
॥१९॥नातिक्रामेत्सदादित्सन्यइच्छेदात्मनोहितं॥अहमस्मैद तं
दामीत्येवमाभाष्यदीयते॥२०॥नैतावत्स्पृष्ट्वादेदतःपात्रेपिफल
मस्तिहि॥दूरस्थाभ्यामपिवान्योपदायमनसावरं॥२१॥इतरन्य
स्ततोदद्यादेषदानविधिःपरः॥सन्निकृष्टमधीयानंब्राह्मणंयो

त्ति लेव्र

व्यतिक्रमेत॥२२॥यद्दाभिंतमुल्लंघ्यतस्त्तेयेन सयुज्यते॥यस्यचास्त्रि
गृहेमूर्खोदूरस्थश्चगुणान्वितः॥२३॥गुणान्विताय दातव्यं नास्ति
स्वी मूर्खेव्यतिक्रमः॥ब्राह्मणातिक्रमोनास्तिविप्रेवेदविवर्जिते॥२४॥
ज्वलंतमग्निमुत्सृज्यनहिभस्मनिहूयते॥आज्यस्थालीच कर्त्तव्या
तैजसद्रव्यसंभवा॥महीमयीवाकर्त्तव्यासर्वास्वाज्याहुतीषु
च॥२६॥आज्यस्थाल्याःप्रमाणंतुयथाकामंतुकारयेत॥सुदृढा
मव्रणांभद्रामाज्यस्थालींप्रचक्षते॥२७॥तिर्यगूर्द्ध्वसमिन्मात्राद्द
ढानातिबृहन्मुखी॥मृन्मय्योदुंबरीवापिचरुस्थालीप्रशस्यते॥
॥२८॥स्वशाखोक्तश्चसुस्विन्नोह्यदग्धोकठिनःशुभः॥नचातिशि १८

थिलःपाच्योनचरुश्चारसस्तथा॥२९॥इध्मजातीयमिध्माद्दिप्रमाणं प्र
मेक्षणंभवेत॥वृत्तंचांगुष्ठपृष्ठाग्रमवदानक्रियाक्षमं॥३०॥एषेव
दर्वीयस्तत्र विशेषस्तमहंब्रुवे॥दर्वीद्व्यंगुष्ठपृष्ठाग्रातुरीयानंच
मेक्षणं॥३१॥मुसलोलूखलेवार्क्षेस्वायतेसुदृढेतथा॥इच्छाप्रमा
णेभवतःशूर्प्पवैणवमेवच॥३२॥दक्षिणंवामतोबाह्यमात्माभि
मुखमेवच॥करंकरस्यकुर्वीतकरणेन्यंचकर्मणः॥३३॥ऋत्वाग्न्य
भिमुखोपाणीस्वस्थानस्थोसुसंयुतो॥प्रदक्षिणंतथासीनःकुर्या
त्परिसमूहनं॥३४॥बाहुमात्राःपरिधयऋजवःसत्वचोव्रणाः॥त्र
योभवंत्यशीर्णाग्राएकेषांतुचतुर्दिशं॥३५॥आगग्न्यावभितःप

Indira Gandhi National
Centre for the Arts

श्चादुदगयमथापरं॥न्यसेत्परिधिमन्यश्चेदुदगग्र:सपूर्वत:॥३६॥
यथोक्तवस्तुसंपन्नोग्राह्यंतदनुकारियत्॥यवानामिवगोधूमाडी
हीणामिवशात्नय॥३७॥श्री॥प॥पिंडान्वाहार्यकंश्राद्धंक्षीणराजा
निशस्यते॥वासरस्यतुरीयंशेनातिसंध्यासमीपत॥३८॥यदाचतु
र्दशीयामंतुरीयमनुपूरयेत्॥अमावास्याक्षीयमाणातदेवश्राद्धमि
ष्यते॥३९॥यदुक्तंयदहस्त्वेवदर्शनंनैतिचंद्रमा:॥अनयापेक्षयाज्ञे
यंक्षीणराजनिचेत्यपि॥४०॥यच्चोक्तंदृश्यमानेपितच्चतुर्दश्यपेक्षया॥
अमावास्यांप्रतीक्षेद्वातदंतेवापिनिर्वपेत्॥४१॥अष्टमेंशेचतुर्दश्या:
क्षीणोभवतिचंद्रमा:॥अमावास्याष्टमेंशेचपुन:किलभवेदणु:॥ १९

॥४२॥आग्रहायण्यमावास्यातथाज्येष्ठस्यायाभवेत्॥विशेषमस्यां
ब्रुवतेचंद्रचारविदोजना:॥४३॥अत्रेंदुराद्येप्रहरेवतिष्ठेच्चतुर्थ
भागोनकलावशिष्ट:॥तदंतएवक्षयमेतिकृत्स्नमेवंज्योतिश्चक्र
विदोवदंति॥४४॥यस्मिन्नब्देद्वादशैकश्चयत्रयस्तस्मिंस्तृतीया
परेदृश्यानियतापज्ञायते॥४५॥एवंचारंचंद्रमसोविदित्वाक्षीणत
ज्यो स्मिंनपरा चदद्यात्॥४६॥संमिश्रायाचतुर्दश्याअमावास्या
नवेक्वचित्॥खर्वितांतांविदु:केचिद्गताध्वामितिचापरे॥४७॥व
र्द्धमानाममावास्यांलभेच्चेदपरेऽहनि॥यामांस्त्रीनधिकांवापि न्व
पितृयज्ञस्ततोभवेत्॥४८॥पद्मादावेवकुर्वीतसदापंक्तादिकं

चरुः॥पूर्वाह्ण एवकुर्वीतेतिविद्वद्भिर्मनीषिणः॥४९॥श्रीः॥६॥स
पितुःपितृत्वस्त्वधिकारोनविद्यते॥नजीवंतमतिक्रम्यकिंचि
द्द्यादितिश्रुतिः॥५०॥पितामहेध्रियतेचपितुःप्रेतस्यनिर्वपेत्॥
पितुस्तस्यचवृत्तस्यजीवेच्चेत्प्रपितामहः॥५१॥पितुःपितुःपितुश्चै
वतस्यापिपितुरेवच॥कुर्यात्पिंडत्रयंयस्यसंस्थितःप्रपिताम
हः॥५२॥जीवंतमतिदद्याद्वाप्रेतायान्नोदकद्विजः॥पितुःपितृभ्य
वादद्यात्सपितेत्यपराश्रुतिः॥५३॥पितामहःपितुःपश्चात्पंचत्वंय
दिगच्छति॥पौत्रेणैकादशाहादिकर्तव्यंश्राद्धषोडशं॥५४॥नेत
त्पौत्रेणकर्तव्यंपुत्रवांश्चपितामहः॥पितुःसपिंडतांत्वत्वाकुर्या २०

पुर्णश्राद्धादि

त्र न्मासानुमासिकं॥५५॥असंस्कृतानसंस्कार्यापूर्वैपौत्रप्रपौत्रकैः
॥पितरंतत्र संस्कुर्यादितिकात्यायनोऽब्रवीत्॥५६॥पापिष्ठमपिशु
द्धेनशुद्धंपापकृतापिवा॥पितामहेनपितरंसंस्कुर्यादितिनिश्च
यः॥५७॥ब्राह्मणादिहतेतातेपतितेसंगवर्जिते॥व्युत्क्रमा मृत त्र
देयंयेभ्यएवददात्यसौ॥५८॥मातुःसपिंडीकरणंपितामह्यास
होदि तं॥यथोक्तेनैवकल्पेनपुत्रिकायानचेत्सुतः॥५९॥नया
पित्रः पृथग्दद्यादवसानदिनाहृते॥स्वभर्तृपिंडमात्राभ्यस्त्रिग
सांयतःस्मृता॥६०॥मातुःप्रथमतःपिंडंनिर्वपेत्पुत्रिकासुतः॥द्वि
तीयंतुपितुस्तस्यास्तृतीयंतुपितुःपितुः॥६१॥श्रीः॥७॥पुरतोया

Indira Gandhi National Centre for the Arts

ऽम नः कर्षूः सापूर्वोपरिकीर्तितः ॥ मध्यमा दक्षिणेनास्या स्यात्तु दक्षिण
त उत्तमा ॥६२॥ वाह्यग्निदिङ्मुखांतास्ताः कार्या सार्द्धांगुलांतराः ॥
तीक्ष्णांता यवमध्याश्च मध्येनावङ्वाल्किरत ॥६३॥ शंकुशंश्च खादि
रः कार्यो रजतेन विभूषितः ॥ शंकुश्चैवोपवेषश्च द्वादशांगुल इ
ष्यते ॥६४॥ अग्न्याशाग्रैः कुशैः कार्य कर्षूणां स्तरणं घनैः ॥ दक्षि  च५
णांतांतदयैस्तु पिच्छयज्ञे परिस्तरेत ॥६५॥ स्त्रुगर्भसुरनिर्यं च
दनादिविलेपनं ॥ सौवीरांजनमित्युक्तं पिंडूलीनां यदंजनं ॥६६॥
स्वस्तरे सर्वमासाद्य यथायदुपयुज्यते ॥ देवपूर्वं ततः श्राद्धमक्ष
रः श्रुचिरारभेत ॥६७॥ आसनाद्यर्घ्यपर्यंतं वसिष्ठेन यथोरितं ॥  २१

॥ कृत्वा कर्मो ततः पात्रे प्रक्तं दद्यात्तिलोदकं ॥६८॥ इत्यार्थगपादत्रामं  घान
त्रेण तु तिलोदकं ॥ गंधोदकं च दातव्यं संनिकर्षक्रमेण तु ॥६९॥
असुरेण तु पात्रेण यस्तु दद्यात्तिलोदकं ॥ पितरस्तस्य नाश्नंति द
शवर्षाणि पंच च ॥७०॥ कुलालचक्रनिष्पन्नमासुरं मृन्मयं स्मृ
तं ॥ तदेव हस्तघटितं स्थाल्यादि दैविकं भवेत् ॥७१॥ गंधान्ब्रा
ह्मणसात्कृत्वा पुष्पाण्यृतुभवानि च ॥ धूपं चैवानुपूर्वेण अग्नौ कुर्या
दनंतरं ॥७२॥ अग्नौकरणहोमश्च क[illegible]र्त्तव्य उपवीतिना ॥ प्राङ्मु
खेनैव देवेभ्यो जुहोतीति श्रुतिः श्रुतेः ॥७३॥ अपसव्येन वा का
र्यो दक्षिणाभिमुखेन च ॥ निरूप्य हविरन्यस्मा[illegible]न्यस्येन दिङ्मु
६

Indira Gandhi National Centre for the Arts

ते॥७४॥स्वाहा कुर्यान्न चात्रांते न चैव जुहुयाद्धविः॥स्वाहाकारेण
हुत्वाग्नौ पश्चान्मंत्रं समापयेत्॥७५॥पित्र्यो यः पंक्तिमूर्द्धन्यस्तस्य
पाणावनग्निमान्॥हुत्वा मंत्रवदन्येषां तूष्णीं पात्रेषु निक्षिपेत्॥७६॥
नो कुर्याद्धोममंत्राणां पृथगादिषु कुत्रचित्॥अन्येषां चाविलुप्ता
नां कालेनाचमनादिना॥७७॥सव्येन पाणिनेत्येवं यदत्र समुदीरि
तं॥परिग्रहणमात्रं तत्सव्यस्यादिशति व्रतं॥७८॥पिंडार्थो ह्यनि
संगृह्य दक्षिणेनेतरात्करात्॥अन्वारब्धं च सव्येन कुर्याद्दुल्लेख
नादिकं॥७९॥यावदर्थमुपादाय हविषोऽन्नकमन्नकं॥चारु
णा सह संनीय पिंडान्दातुमुपक्रमेत्॥८०॥पितुरुत्तरकर्षु २२

शे मध्यमे मध्यमस्य तु॥दक्षिणे तत्पितुश्चैव पिंडान्पर्वणि निर्वपे
त्॥८१॥वाममावर्त्तनं केचिदुदगंतं प्रचक्षते॥सर्वे गोतमशां
डिल्यौ शांडिल्यायन एव च॥८२॥आवृत्य प्राणमायम्य पितृ
न्ध्यायन्यथार्हतः॥जपंस्तेनैव चावृत्य ततः प्राणं प्रमोच
येत्॥८३॥शाकं च फाल्गुनीष्टम्यां स्वयं पत्न्यपि वा पचेत्॥यत्त
शाकादिहोमश्च कार्योऽष्टपाष्टकावृता॥८४॥अन्वष्टक्यं मध्य
मायामिति गोभिलगौतमौ॥वार्कखंडिश्च सर्वासु कौत्सो मे
नेष्टकासु च॥८५॥स्थालीपाकं पशुस्थाने कुर्याद्यद्यानुकल्पि
कं॥अपयत्वं समस्तायास्तरुण्या गोः पयस्यतु॥८६॥श्री॥

Indira Gandhi National
Centre for the Arts

॥८॥ सायमादि प्रातरंतमेकं कर्म प्रचक्षते ॥ दर्शांतं पौर्णमासा-
द्यमेकमेवमनीषिणः ॥ ८७ ॥ ऊर्द्ध्वं पूर्णाहुतेर्दर्शः पौर्णमासो
पि वाग्रिमः ॥ य आयाति स होतव्यः स एवादिरिति श्रुतेः ॥ ८८ ॥
ऊर्द्ध्वं पूर्णाहुतेः कुर्यात्सायंहोमादनंतरं ॥ वैश्वदेवं तु पा-
कांते बलिकर्मसमन्वितं ॥ ८९ ॥ ब्राह्मणान् भोजयेत्पश्चा-
द् निरूपांश्च शक्तितः ॥ यजमानस्ततोश्नीयादिति कात्या-
यनोऽब्रवीत् ॥ ९० ॥ वैवाहिकेग्नौ कुर्वीत सायंप्रातस्त्वतं-
कर्म२ द्रितः ॥ चतुर्थी […] कृत्वैतदेतच्छांद्यायनेर्मतं ॥ ९१ ॥ ऊ-
र्द्ध्वं पूर्णाहुतेः प्रातर्हुत्वा तां सायमाहुतिं ॥ प्रातर्होमं ततः २३

कुर्यादेष एवान्तरो विधिः ॥ ९२ ॥ […] सायंहोमात्ययो
प्रातर्हुत्वा तां सायमाहुतिं ॥ प्रातर्होमस्तदैव स्यादेष एवा-
न्तरो विधिः ॥ ९३ ॥ पौर्णमासात्ययेदर्श्यं होतव्यदर्भवेत्
॥ तदर्द्धं जुहुयादेवममावास्यात्ययेपि च ॥ ९४ ॥ प्राङ्मुखयमा-
नेन श्रौतं न येन्मासं समाहितः ॥ संपन्ने तु यथातंत्रं हूयते तत्
ऽहुता। दिहोच्यते ॥ ९५ ॥ […] परिसंख्याय पात्रेस्त्वाहुतीः सजूत[…]
॥ मंत्रेण विधिवद्धुत्वैवमेवापरा अपि ॥ ९६ ॥ यत्र व्याहृतिभिर्हो-
मः प्रायश्चित्तात्मको भवेत् ॥ चतस्रस्तत्र विज्ञेयाः स्त्रीपाणिग्रह-
णे यथा ॥ ९७ ॥ अपि वाज्ञातमित्येषा प्राजापत्यापि वाहुतिः ॥

Indira Gandhi National Centre for the Arts

होतव्यस्त्रि विकल्पोयं प्रायश्चित्तविधिस्मृतः ॥९॥ हायद्यग्निरग्नि
नान्येन संभवेदाहितः क्वचित ॥ अग्नये विविचय इति जुहुयाद्वि
हृताहुतिं ॥१०॥ अग्नये प्सुमते चैव जुहुयाद्देह तेन चेत ॥ अ
ग्नये शुचये चैव जुहुयाद्वहुरग्निना ॥११॥ यद्यदाहाग्निनाग्नि
स्तु यथा वः क्षामवाहितं ॥ दावाग्निनाच संसर्गाद्भिद यं यदि स८
तप्यते ॥१२॥ हविर्भूतो यदि संस्पृष्टं संस्पृष्टमुपशामयेत ॥ अ
संस्पृष्टं जागरये ह्यग्निरित्येवमुक्तवान् ॥१३॥ न स्वेग्नावन्य हो
मः स्यान्मुहूर्त्तं काऽसमिदाहुतिं ॥ स्वगर्भसंक्रियार्थाय श्रूयाव
न्नासोप्रजायते ॥१४॥ अग्निस्तु नामधेयादो होमे सर्वत्रलौकि २८

कः ॥ नहि पित्रा समानीतः पुत्रस्य भवति क्वचित ॥६॥ यस्याग्ना
वन्यहोमः स्यात्स वैश्वानरदैवतं ॥ चरुं निरुप्य जुहुयात्प्राय
श्चित्तं तु तस्य तत ॥५॥ परेणाग्नौ हुते स्वार्थे परस्याग्नौ हुते स्व
ये ॥ पितृयज्ञात्यये चैव वैश्वदेवद्वयस्य च ॥६॥ अनिष्ट्वा नव
यज्ञेन नवान्नप्राशने तथा ॥ भोजने पतितान्नस्य चरुर्वैश्वा
नरो भवेत ॥७॥ स्वपितृभ्यः पिता दद्यात्सुतसंस्कारकर्मसु ॥
पिंडानोद्वहनात्तेषां तस्याभावे तु तत्क्रमात ॥८॥ भूतप्रवाचने
पत्नी यद्यसंनिहिता भवेत ॥ रजोरोगादिना तत्र कथं कुर्वतिया
ज्ञिकाः ॥९॥ महानसेन्नं या कुर्यात्सवर्णां तां प्रवाचयेत ॥ प्रण

Indira Gandhi National
Centre for the Arts

वाद्यपिवाकुर्यात्कात्यायनवचोयथा॥१०॥यज्ञवास्तुनिमुष्ट्यांच
स्तंबेदर्भवटौतथा॥दर्भसंख्यानविहिताविष्टरास्तरणेषुच ॥ठ॥
॥ ॥११॥खंडानिछिद्याग्निःस्वदारेषुपरिकल्प्यद्विजंतथा॥
प्रवसेत्कार्यवान्विप्रोमृषैवनचिरंक्वचित्॥१२॥मनसानैत्ति स्म
कंकर्मप्रवसन्नप्यतंद्रितः॥उपविश्यशुचिःसर्वंयथाकाल
मनुद्रवेत्॥१३॥पत्न्याचाप्यवियोगिन्याशुश्रूष्योऽग्निर्विनी
तया॥सौभाग्यवित्तावैधव्यकामयाभर्तृभक्तया॥१४॥यावास्या
सौ द्वीरसूरासामाज्ञासंपादिनीप्रिया॥दक्षाप्रियंवदाशुद्धाता ठा २
मत्रविनियोजयेत्॥१५॥दिनक्रमेणवाकर्मयथाऽपेक्ष्यान्व २५

ह्य
शक्तितः॥विभज्यसद्भवाकुर्युर्यथाज्ञानमशा वत्॥१६॥स्त्रीणां॰
सौभाग्यतोऽर्घ्यंदिद्ययैवैहिजन्मनां॥नहिस्वल्पेनतपसाभ
र्त्तानुष्यतियोषितां॥१७॥भर्तुरादेशवर्तिन्यायमामावक्रुभि
र्व्रतैः॥अग्निश्चतोषितोमुत्रसास्त्रीसौभाग्यमाप्नुयात्॥१८॥
श्रोत्रियःसुभगांगांचाग्निमग्निचितंतथा॥प्रातरुत्थाययः
प्र पश्येदापद्भ्यःसं मुच्यते॥१९॥विनयाविनतापिस्त्रीभर्तु
र्यादुर्भगाभवेत्॥अमुत्रामाग्निभर्तृणांमवज्ञातिःकृतातया॥
॥२०॥पापिष्ठंदुर्भगामंत्यंनग्नमुत्कृन्तनासिकं॥प्रातरुत्थायपः
पश्यसकलेरुपयुज्यते॥२१॥पतिमुल्लंघ्यमोहात्स्त्रीकिंकिंन

Indira Gandhi National Centre for the Arts

नरकं व्रजेत॥ लब्ध्वा मानुष्यतां प्राप्य किं किं दुःखं न पश्यति
॥२२॥ पतिशुश्रूषयैव स्त्री सर्वान्लोकान्समश्नुते॥ दिवः
पुनरिहायाता सुखानामम्बुधिर्भवेत्॥२३॥ सदारोन्यान्पुन
क्रुतस्थि र्दारान्कथंचित्कारणांतरात्॥ यदिच्छेदग्निमान्कर्तुं क्व होमोस्य
विधीयते॥२४॥ स्वेग्नावेव भवेद्धोमो लौकिके न कदाचन॥
न ह्याहिताग्नेः स्वं कर्म लौकिकेग्नौ विधीयते॥२५॥ षडाहु
तिकमन्यं तु जुहुयात् कृत्वाक्रवदर्शनात्॥ न ह्यात्मनोर्थं स्यात्ता
वद्यावन्नपरिणीयते॥२६॥ पुरस्ताद्विविकल्पं यत्प्रायश्चित्त २६

मुदाहृते॥ तस्य षडाहुतिकं शिष्टैर्यज्ञविद्भिः प्रकीर्तितं॥२७॥
॥ ॥श्रीः॥१०॥ ॥इति द्वितीयः प्रपाठकः॥ ॥छ॥ असमक्षं तु
दंपत्योर्हौतव्यं न ऋत्विगादिना॥ द्वयोरप्यसमक्षं हि भवेद्धुत
मनर्थकं॥२८॥ विहायाग्निं सभार्यश्चेत्सीमामुल्लंघ्य गच्छति ॥
होमकालात्यये तस्य पुनराधानमिष्यते॥२९॥ अरण्योः क्ष
यनाशाग्निदाहेष्वग्निं समाहितः॥ पाल्य यदुपशांतेऽस्मि
न्पुनराधानमिष्यते॥३०॥ ज्येष्ठा चेद्बहुभार्यस्य … दतिचारे स्वश्र
ण गच्छति॥ पुनराधानमत्रैके इच्छंति न तु गौतमः॥३१॥ … द त
यि वाग्निभिर्भार्यां सदृशीं पूर्वसंस्थितां॥ पात्रैश्चाथाग्निमाद

Indira Gandhi National
Centre for the Arts

अत्र विषयज्यष्ठाः समानवर्णा इति ॥ २

थाङ्क्तदा रो विलंबितः ॥ ३१ ॥ एवं वृत्तां सवर्णां स्त्रीं द्विजातिः पू
यि-चा र्वमारिणीं ॥ दाहयेदग्निहोत्रेण यज्ञपात्रैश्च धर्मवित् ॥ ३२ ॥ द्वि
तीयां चेद्वयः पत्नी दहेद्वैतानिकाग्निभिः ॥ जीवंत्यां प्रथमायां
तु सुरापानसमं हि तत् ॥ ३३ ॥ मृतायां तु द्वितीयायां योऽग्नि
होत्रं समुत्सृजेत् ॥ ब्रह्मोज्झं तं विजानीयाद्यश्च कामात्समु
त्सृजेत् ॥ ३५ ॥ मृतायामपि भार्यायां वैदिकाग्निं न हि त्यजेत् ॥
उपाधिनापि तत्कर्म यावज्जीवं समापयेत् ॥ ३६ ॥ रामोऽपि कृ
त्वा सौवर्णीं सीतां पत्नीं यशस्विनीं ॥ ईजे यज्ञैर्बहुविधैः सह
भ्रातृभिरच्युतः ॥ ३७ ॥ यो दहेदग्निहोत्रेण स्वेन भार्यां कथं २७

चन ॥ स स्त्री संपद्यते तेन भार्या चास्य पुमान्भवेत् ॥ ३८ ॥ भार्याम
भ॰हा॰ रणमापन्नां देशांतरगतापि वा ॥ अधिकारी भवेत्पुत्रो महापात
किनि द्विजे ॥ ३९ ॥ मान्या चेन्म्रियते पूर्वं भार्या पतिविमानिता ॥
॥ त्रीणि जन्मानि सा पुंस्त्वं पुरुषः स्त्रीत्वमृच्छति ॥ ४० ॥ पूर्ववै मर्द
योनिः पूर्वविस्तुरो न राधानकर्मणि ॥ विशेषात्त्राग्न्यकपरस्था
न माऽप्याकुत्यष्टकं तथा ॥ ४१ ॥ अन्वायाहुतिहोमांतमुपति
ष्ठत पावकं ॥ अध्यायः केवलाग्नेयः कस्तेजामिरमानसः
॥ ४२ ॥ अग्निमीडेऽग्न आयाह्यग्न आयाहि वीतये ॥ तिसाग्नि
ज्योतिरित्यग्निं दूतमग्ने मृडेति च ॥ ४३ ॥ इत्यष्टावाहुतीर्हुत्वा

Indira Gandhi National
Centre for the Arts

यथाविध्यनुपूर्वशः॥ पूर्णाहुत्यादिकं सर्वमन्यत्पूर्ववदाच
रेत्॥४४॥ अरण्योरल्पमप्यंगं यावत्तिष्ठति पूर्वयोः॥ न तावत्पु
नराधानमन्यारण्योर्विधीयते॥४५॥ विनष्टेऽस्कं कुस्कं वन्यु
बृ डं पत्यकुस्त्वालमुदर्चिषि॥ प्रत्यगग्रं च मुसलं प्रहरेज्ज्ञातवे
दसि॥४६॥ श्रौताः स्वयं होमासमर्थस्यासमीपउपसर्पणं॥
तत्राप्यशक्तस्य सतः शयनाच्चोपवेशनं॥४७॥ हुतायां सायं
माहुत्यां दुर्बलश्चेदगृही भवेत्॥ प्रातर्होमस्तदैव स्याज्जीवे त
चेच्छः पुनर्नवा॥४८॥ दुर्बलं स्नापयित्वा तं शुद्धचेलाभिसं २८
वृतौ। दक्षिणाशिरसं भूमौ बर्हिष्मत्यां निवेशयेत्॥४९॥ घृ

तेनाभ्यक्तमाप्लाव्य सुवस्त्रमुपवीतिनं॥ चंदनोक्षितसर्वांगं सु
मनोभिर्विभूषयेत्॥५०॥ हिरण्यशकलान्यस्य क्षिप्त्वाच्छिद्रेषु
सप्तसु॥ मुखेष्वथापिधायैनं निर्हरेयुः सुतादयः॥५१॥ आ
मपात्रेऽन्नमादाय प्रेतमग्निपुरस्सरं॥ एकोनुगच्छेत्तस्यार्द्धम
र्द्धं पथ्युत्सृजेद्भुवि॥५२॥ अर्द्धमादहनं प्राप्य आसीनो दक्षि आ५
णामुखः॥ सव्यं जान्वाच्य शनकैः सतिलं पिंडदानवत्॥५३॥ देश
अथ पुत्रादिराप्लुत्य कुर्याद्दारुचयं महत्॥ भूप्रदेशे शुचौ पु
२ द त्रे पश्चाच्चित्यादिलक्षणे॥५४॥ तत्रोत्तानं निपात्यैनं दक्षिणा
शिरसं मुखे॥ आज्यपूर्णां स्रुचं दद्याद्दक्षिणाग्रां नसि स्रुक्

Indira Gandhi National
Centre for the Arts

वं॥५५॥पादयोरधोरांप्राचीमरत्नीमुरसीतरां॥पार्श्वयोःश्रूर्प्पेच
मसोसव्यंदक्षिणयोःक्रमात॥५६॥मुसलेनसहन्यंक्षं मेतरो
वेरिुलूखले॥चौचोविलिकमन्नेवाऽनश्रूनयनोविभीः॥५७॥
अपसव्येनज्ञवैतद्यागयतःपितृदिङ्मुखः॥अथाग्निऽसव्य
ज्ञान्वक्तोदद्याद्दक्षिणतःशनैः॥५८॥अस्मात्वमधिजातासि
त्वदयंजायतांपुनः॥असौस्वर्गायलोकायस्वाहेतियज्ञ
ीरयन्॥५९॥एवंगृहपतिर्दग्धःसर्वंतरतिदुष्कृतं॥यश्चै
नंदाहयेत्सोपिप्रजांप्राप्नोत्यनिंदितां॥६०॥यथाह्यायुधधृ स्वा
क्यांथोह्यारण्यांन्यपिनिर्णयः॥अतिक्रम्यात्मनोभीष्टंऽच्छा २९

नमिहाऽश्रुविंदति॥६१॥उक्तौतौद्वारदेशेचमिश्रांतौचास्थि
संचयो॥स्तंबसंप्रवसेचैववषट्टपिंडाऽश्वनिर्वपेत॥६२॥ए
वमेषोऽग्निमान्दग्धःपात्रायुधविभूषितः॥लोकानन्यान
तिक्रम्यपरंब्रह्मैवविंदति॥६३॥श्री॥२॥अथानपेक्ष्यमत्या मे ४
पःसर्वएवशावस्त्रचाःस्नात्वासचैलमाचम्यदक्षरस्यादक ८
स्थले॥६४॥गोत्रनामानुवादांतेतदयामीत्यनंनराः॥दक्षि
णाग्रान्कुशान्कृत्वासतिलंतुपृथक्पृथक्॥६५॥एवंज्ञ
त्वोदकांसम्यक्सर्वान्शाड्वलसंस्थितान्॥आह्रत्यपु
नराचांतान्वदेयुस्तेऽनुयायिनः॥६६॥माशोकंकुरुता

नित्यसर्वस्मिन्प्राणधर्मणि॥धर्मं कुरुत यत्नेन यो वः सहगामि
ष्यति॥६७॥मानुष्ये कदलीस्तंभे निःसारे सारमार्गणं॥करोति
यः स संमूढो जलबुद्बुदसंनिभे॥६८॥गंगा वसुमती नाशमु
दधिर्दैवतानि च॥फेनप्रख्यः कथं नाशं मर्त्यलोको न यास्यति
॥६९॥पंचधा संभृतः कायो यदि पंचत्वमागतः॥कर्मभिः स्व
वेद शरीरोत्थैस्तत्र का परिदेवना॥७०॥सर्वे क्षयांता निचयाः पत
नांताः समुच्छ्रयाः॥संयोगा विप्रयोगांता मरणांतं हि जीवि
तं॥७१॥श्लेष्माश्रु बांधवैर्मुक्तं प्रेतो भुंक्ते यतोऽवशः॥अ
तो न रोदितव्यं हि क्रियाः कार्याः प्रयत्नतः॥७२॥एवमुक्त्वा व्र ३०

जेयुस्ते गृहान्बालपुरस्सराः॥स्नानाग्निःस्पर्शनाज्याशैः शुद्ध्येयु
रितरे ज्ञातेः॥७३॥श्री॥३॥एवमेवाहिताग्नेस्तु पात्रन्यासादि
कं भवेत्॥कृष्णाजिनादिकश्चात्र विशेषोऽध्वर्युचोदितः॥७४॥
॥विदेशमरणे स्थीन्याहृत्याभ्यज्य सर्पिषा॥दाहयेदूर्णया
च्छाद्य पात्रन्यासादि पूर्ववत्॥७५॥अस्थ्नामलाभे पर्णानि श
कलान्युक्तया वृता॥भर्जयेदस्थिसंख्यानि ततः प्रभृति सूत
कं॥७६॥महापातकसंयुक्तो दैवात्स्यादग्निमान्यदि॥पुत्रादि
पालयेदग्नीन्युक्तश्चादोषसंख्यायात्॥७७॥प्रायश्चित्तं न कु
र्याद्यः कुर्वन्वा म्रियते यदि॥गृह्यं निर्वापयेच्छ्रौतमप्स्वस्येत्स

Indira Gandhi National Centre for the Arts

परिछदं॥७८॥सादयेदुभयं वाप्यद्धोग्निरनवद्यतः॥पात्राणि
दद्याद्विप्राय दद्याद्दप्स्वेव वा क्षिपेत्॥७९॥अनयैवावृता ना
री दुग्ध्वा याया यद्यवस्थिता॥अग्निप्रदानमंत्रोस्यान्नप्रयोज्य
इति स्थितिः॥८०॥अग्निनैव दहेद्भार्यां स्वतंत्रां पतितां न चे
त्॥तदुत्तरेण पात्राणि दाहयेत्पृथगंतिके॥८१॥अपरेद्युस्तृ
तीये वाह्नि संचयनं भवेत्॥यस्तत्र विधिरादिष्ट ऋषिभिः सो
धुनोच्यते॥८२॥स्नानां तं पूर्ववद्भागव्ये नपयसा ततः॥सिं
चेदस्थीनि सर्वाणि प्राचीनावीत्यभाषयन्॥८३॥शमीपला
शशाखाभ्यामुद्धृत्योद्धृत्य भस्मनः॥आज्येनाभ्यज्य गव्ये २१

नसिंचयेद्गंधवारिणा॥८४॥मृत्पात्रसंपुटे कृत्वा सूत्रेण परिवे
ष्ट्य च॥श्वभ्रं खात्वा शुचौ भूमौ निखनेद्दक्षिणामुखः॥८५॥पूर
यित्वावटं पंकपिंडं शैवालसंयुतं॥दत्वोपरि समं शेषं कु
र्यात्स्नानादिकर्मणि॥८६॥एष एवाहिताग्नेः प्रोक्तस्य वि
धिरिष्यते॥स्त्रीणामप्यग्निदानं स्यादथातोनुक्तमुच्यते॥८७
॥श्रीः॥४॥सूतके कर्मणां त्यागः संध्यादीनां विधीयते॥होमः
श्रौतेतु कर्त्तव्यः शुष्कान्नेनापि वा फलैः॥८८॥अकृतं होम
येत्स्मार्त्ते तदभावे कृताकृतं तंदुलं वा होमयेद्धृतमनारंभविधि
न ततः॥८९॥अकृतमोदनसक्त्वादि तंदुलादि कृताकृतं॥व्रीह्या

दिवास्तं प्रोक्तमिति द्वयं विधा बुधैः ॥९०॥ सूतके च प्रवासे चा
शक्तौ श्राद्धभोजने ॥ एवमादिनिमित्तेषु हावयेदिति योजयेत्
॥९१॥ न त्यजेत्सूतके कर्म ब्रह्मचारी स्वकं क्वचित् ॥ न दीक्ष
णात्परं यज्ञे न कृच्छ्रादितपश्चरन् ॥९२॥ पितर्यपि मृते नैषां
दोषो भवति कर्हिचित् ॥ आशौचं कर्मणोंते स्यात्त्र्यहं वा ब्रह्म
एणं चारिणः ॥९३॥ श्राद्धमग्निमतः कार्यं दाहादेकादशेहनि ॥
प्रत्याब्दिकं तु कुर्वीत प्रमीताहनि सर्वदा ॥९४॥ द्वादशप्र
तिमासं तु आद्यषाण्मासिके तथा ॥ सपिंडीकरणं चैवमेत ३२

अर्द्धं इत्यर्थः कृतेः प्रेते परमेष्ठिनि यज्ञवत् ॥ बलिकर्म तदेवस्याः श्रायन्मद्धं मतोन्यथा ॥१॥
एतद्दृष्टमतो प्रेते अर्या दशाद्दशेहनि ॥ प्रागेव द्वादशाह्ना सद्योजागरादि दिने ॥२॥ ३२

य१

द्धि श्राद्धषोडशं ॥९५॥ एकाहेन तु षण्मासा यदा स्युरपि वा त्रि
भिः ॥ न्यूनाः संवत्सरश्चैव स्यातां षाण्मासिके तथा ॥९६॥
सूतके तु समुत्पन्ने स्मार्त्तकर्म कथं भवेत् ॥ पिंडयज्ञं चरुं
होमम सगोत्रेण कारयेत् ॥९७॥ यानि पंचदशाद्यानि अ
पुत्रस्येतरेण तु ॥ एकस्यैवानुदातव्यमपुत्राया अपि सर्वदा ॥
॥९८॥ न योषायाः पतिर्दद्यादपुत्राया अपि क्वचित् ॥ न पुत्र
स्य पिता चैव नानुजस्य तथाग्रजः ॥९९॥ एकादशेऽह्नि नि
र्वर्त्या वा कुर्दर्शाद्यथाविधि ॥ प्रकुर्वीताग्निमान्पुत्रो मातापि
त्रोः सपिंडनं ॥१००॥ सपिंडीकरणादूर्द्धं न दद्यात्प्रतिमासि

५ एकस्मिन्नह्नि देयानि सपुत्रस्यैव ५

Indira Gandhi National Centre for the Arts

कं॥ एकोद्दिष्टविधानेन दद्यादित्याह गौतमः॥१॥ कर्षूसमन्वि
तं मुक्त्वा तथाद्य॰श्राद्धषोडशं॥ प्रत्याब्दिकं च शेषेषु पिंडाः ३२
स्युः षडिति स्थितिः॥२॥ अर्घ्येऽक्षय्योदके चैव पिंडदानेऽव
नेजने॥ तंत्रस्य तु निवृत्तिः स्यात्स्वधावाचन एव च॥३॥ ब्रह्म
दंडादियुक्तानां येषां॰स्यान्नाग्निसत्क्रिया॥ श्राद्धादिस
त्क्रियाभाजो न भवंतीह ते क्वचित्॥४॥ श्री॥५॥ मंत्राम्नाये
ग्न इत्येतत्पंचकं स्याद्यवार्थिभिः॥ पच्यते तत्प्रयोगे स्यान्म
त्राणामत्र विंशतिः॥५॥ अग्नेः स्थाने वायुचंद्रसूर्यबकु
वद्दह्याच॥ समस्य पंचमी॰स्त्रेचतुर्थ्यतुरितिश्रुतेः॥६॥ ३३

॥प्रथमे पंचके पापीलक्ष्मीरिति पदं भवेत्॥ अपि पंच सुमं
त्रेषु इति पद्भविदो विदुः॥७॥ द्वितीये तु पतिघ्नी स्याद्पु
त्रेति तृतीयके॥ चतुर्थे त्वपशव्येतीदसाद्भुतिविशाकं॥८॥ भू
ति होमेन प्रयुंज्याद्धोवामसुतथाष्टसु॥ चतुर्थीम घ्नइत्येतां
ज्ञानाम्नि नहि हूयते॥९॥ नताग्रदर्भवोत्तुघ्नः स्रुगंतिपरि
कीर्त्यते॥ प्रतिष्ठितावतवती ब्रह्मबंधुस्तथाकृतः॥१०॥ शा
लादुनीलमित्यक्तं ग्रघ्नस्तबक उच्यते॥ कपुस्थिकाभितःके
शान्मूर्ध्नि पश्चात्कपुच्छलं॥११॥ श्वाविच्छलाकाशालत्नीत
थावीरतरःशारः॥ तिलतंदुलसंपक्कः कृसरः सोभिधीय

Indira Gandhi National Centre for the Arts

ते॥१२॥नामधेयेमुनिवसुपिशाचावद्भवसदा॥यज्ञाश्चपित
रोदेवायष्टव्यास्तिथिदेवता॥१३॥आग्नेयाद्येथसार्पाद्येविशा
षाद्येतथैवच॥आषाढाद्येधनिष्ठाद्येअश्विन्याद्येतथैवच॥१४॥
इंद्वान्येतानिबद्भवद्दज्ञाणांजुहुयात्सदा॥द्वंद्वइयंद्विवच्छेष
मवशिष्टान्यथैकवत्॥१५॥देवतास्वपिद्व्यंतेबद्भवसर्प
पितृषः॥देवाश्चवसवश्चापिद्विवदेवाश्विनौसदा॥१६॥ब्रह्म
चारीसमादिष्टोगुरुणाव्रतकर्मणि॥बाढमोमितिवाब्रूयात्तत्त
थैवानुपालयेत्॥१७॥सशिखंवपनंकार्यमास्नानाद्ब्रह्मचा
रिणां॥आशरीरविमोक्षायब्रह्मचर्यंनचेद्भवेत्॥१८॥वपनं ३८

नास्यकर्त्तव्यमर्वाग्गोदानिकव्रतात्॥इतिलोवसरंयावत्षण्मा
सानितिगौतमः॥१९॥नगात्रोत्सादनंकुर्यादनापदिकदाचन॥
जलक्रीडामामलकान्वृतीदंडइवाप्लवेत्॥२०॥देवतानांविप
र्यासेजुहोतिषुकथंभवेत्॥सर्वप्रायश्चित्तंहुत्वाक्रमेणजुहु
यात्पुनः॥२१॥संस्काराप्रतिपद्येरंस्वकालाच्चेत्कथंचन॥हु
त्वैतदेवकर्त्तव्यायेतूपनयनादधः॥२२॥अनिष्ट्वानवयज्ञेनन
वान्नंयोत्यकामतः॥वैश्वानरश्चरुस्तस्यप्रायश्चित्तंविधीयते
॥२५॥श्री॥६॥चरुःसमश्नानीयोयस्तथागोयज्ञकर्मणि॥ग्र
षभोत्सर्जनेचैवाश्वयज्ञेतथैवच॥२७॥श्रावण्यांचप्रदोषेयः

कृष्णारंभेतथैवच॥कथमेतेषुनिर्वापाःकथंचैवदनुहोतयः॥२५॥
देवतासंख्ययाग्राह्या निर्वापास्तुपृथक्पृथक्॥इत्नीहविरव
रुद्धौयाहोमश्चापिपृथक्पृथक्॥२६॥यावताहोमनिर्वृत्ति
र्नवेद्यायत्रकीर्त्तिता॥शेषंचैवनवक्किंचित्तावतंनिर्वपेच्चरुं॥
॥२७॥चरौसमशनीयेतुपिष्टयज्ञेचरौतथा॥होतव्यमेवगणेनै
न्यमुपस्तीर्णाभिघारितं॥२८॥कालःकात्यायनेनोक्तोविधिश्चै
वसमासतः॥वृषोत्सर्गेयितोनात्रगोभिलेनतुभाषितं॥२९॥
पारिभाषिकएवस्यात्कालोगोवाजियज्ञयोः॥अन्यस्यानुपदे
शाच्चस्वस्तरारोहणेस्यच॥३०॥अथवामार्गपाल्यंक्तिकालोग॥ २५

यज्ञकर्मणः॥नीराजनाक्तिचाश्वानामितितंत्रांतरेविधिः॥३१॥शरद्व
संतयोःकेचित्नवयज्ञंप्रचक्षते॥धान्यपाकवशादन्येश्यामाकोवनि
नस्मृतः॥३२॥आश्वयुज्यांतथाकृष्यांवास्तुकर्मणियाज्ञिकाः॥यज्ञा
र्थतत्त्ववेत्तारोहोममेवंप्रचक्षते॥३३॥द्वेपंचद्वेक्रमेणैताहविराहुत
यस्मृताः॥शेषाआज्येनहोतव्याइतिकात्यायनोब्रवीत्॥३४॥प
योयदाज्यसंयुक्तंतत्पृषातकमुच्यते॥दध्येकेतदुपासाद्यकर्त्तव्यः
पायसश्चरुः॥३५॥व्रीहयःशालयोमुद्गागोधूमासर्षपास्तिलाः॥य
वाश्चौषधयःसप्तविपदोघ्नंतिधारिताः॥३६॥सत्स्काराःपुरुषस्य
तेस्मर्यंतेगौतमादिभिः॥अतोष्टकादयःकार्याःसर्वेकालकमादि

६

Indira Gandhi National Centre for the Arts

ता:॥३७॥सन्नदद्युष्टकादीनि कुर्यात्कर्माणि यो द्विजः॥सपङ्क्तिपा
वनो भूत्वा लोकान्प्रैति हुतश्रुतः॥३८॥एकादशमपि कर्मस्थो यो
ऽग्निशुश्रूषकः शुचिः॥न यत्पुत्र तं देवास्यशतादेशे विज्ञायते॥३
९॥यस्त्वाधायाग्निमाशास्य देवादीन्नेभिरिष्टवान्॥निराकर्ता
मरादीनां स विज्ञेयो निराकृतिः॥४०॥ ॥यच्छ्राद्धं कर्मणा मादौ या
चां ते दक्षिणा भवेत्॥आमावास्यं द्वितीयं यदन्वाहार्यं तदुच्य
ते॥४१॥एकसाध्येष्ट बर्हिःषु न स्यात्परिसमूहनं॥नोदगासा
दनं चैव क्षिप्रहोमा हि ते मताः॥४२॥अभावे व्रीहियवयोर्दध्ना
वा पयसापि वा॥तदभावे यवाग्वा वा जुहुयादुदकेन वा॥४३॥ ३६

रो इंतुराङ्गं संपिष्ट्या मासु रं चाभिचारिकं॥उल्कामंत्रं स्पृशेदपश्चाल
न्यात्मानमेव च॥४४॥यज्ञनीये हि सोमश्चेद्वारुण्यां दिशि दृश्यते॥
तत्र व्याहृतिभिर्हुत्वा दंडं दद्याद्द्विजातये॥४५॥लवणं मधु मांसे
च क्षारं यच्छ येन हूयते॥उपवासेन भुंजीत नोरु रात्रौ न किंचन॥
॥४६॥स्वकाले सायमाहुत्यरप्राप्तौ होत्र द्रव्ययोः॥प्राकूपातराहु
तेः कालः प्रायश्चित्ते हुते सति॥४७॥प्राकू सायमाहुतेः प्रातर्होमका
लानतिक्रमः॥प्राकू पौर्णमासाद्दर्शस्य प्राग्दर्शादितरस्य च॥४८
वैश्वदेवव्रतिक्रांते अहोरात्रमभोजनं॥प्रायश्चित्तमथो हुत्वा पुनः
संतनुयाद्धुतं॥४९॥होममद्वयात्यये दर्शपौर्णमासात्ययेतथा॥

Indira Gandhi National
Centre for the Arts

पुनरेवाग्निमादध्यादिति भार्गवानुशासनं ॥४५॥ अन्तश्चोमाणवोऽङ्क
यएणः कृष्णमृगस्मृतः ॥ रुरुर्गौरमृगः प्रोक्तस्तैर्वैलिः शाणउच्य
ते ॥५१॥ केशांतिको ब्राह्मणस्य दंडः कार्यः प्रमाणतः ॥ ललाट
संमितो राज्ञः स्यात्तु नासांतिको विशः ॥५२॥ ऋजवस्ते तु सर्वे स्यु
रव्रणाः सौम्यदर्शनाः ॥ अनुद्वेगकरा नॄणां सत्वचो नाग्निदूषि
ताः ॥५३॥ गोविशिष्टतमा विप्रा वेदेष्वपि निगद्यते ॥ न ततोन्यद्वरं
यस्मात्तस्माद्गौर्वर उच्यते ॥५४॥ येषां व्रतानां मंतेषु दक्षिणा न वि न३
धीयते ॥ वरस्तत्र भवेद्दानमपि वाछादयेद्गुरुं ॥५५॥ अस्नाना
द्वा सविच्छेदद्यौ घणाध्यापनादिकं ॥ प्रामादिकं कृते यस्या ३०

यातयामच्च कारितं ॥५६॥ उत्सृष्टं यदुपाकर्मीसो संर्गविधि
वद्द्विजैः ॥ क्रियते छंदसांतेन पुनराप्यायनं भवेत् ॥५७॥ अ
यातयामैश्छंदोभिर्यत्कर्म क्रियते द्विजैः ॥ क्रीडमानैरपि सदा त रमभाणे
त्तेषां सिद्धिकारकं ॥५८॥ गायत्री च सगायत्रां बार्हस्पत्यमि
ति त्रिकं ॥ शिष्येभ्योनूच्य विधिवदुपाकुर्यात्ततः श्रुतिं ॥५९॥ छं
दसामेकविंशानां संहितायां यथाक्रमं ॥ तच्छंदस्काभिरद
ग्भिराद्याभिर्होम इष्यते ॥६०॥ पर्वभिश्चैव गानेषु ब्राह्मणेषू
त्तरादिभिः ॥ अंगेषु चर्चा मंत्रेष्विति षष्टिर्जुहोतयः ॥६१॥ श्री
॥८॥ अक्षतास्तु यवाः प्रोक्ता भ्रष्टा धाना भवंति ते ॥ भ्रष्टास्तु व्री ३१

Indira Gandhi National
Centre for the Arts

ह्योलाङ्गाद्यदाःखांडिक उच्यते॥६२॥नाधीयीत रहस्यानि सो
त्तराणि विचक्षणः॥न चोपनिषदश्चैव षण्मासां दौक्षिणायना
त्॥६३॥उपाकृत्याद गायनेन ततोधीयीत धर्मवित॥उत्सर्गश्चै
क एवैषां तैष्यां प्रोष्ठपदेपि वा॥६४॥अज्ञातयंडनालाम्नी
न तया सह संविशेत॥अयुग्मः काकवंध्यायाज्ञातां तान्न वि
वाहयेत॥६५॥स०सक्तपदविन्यासस्त्रिपदः प्रक्रम स्मृतः॥
स्मार्त्तें कर्मणि सर्वत्र श्रौते त्वध्वर्युचोदितं॥६६॥यस्यां दिशि
बलिं दद्यात्तामेवाभिमुखो दिशं॥अवणा कर्मणि न वेद्यं
च कर्मनं सर्वदा॥६७॥बलिषे शाषस्य हवनमग्निप्रणय ३८

नं तथा॥प्रत्यहं नन वेया तामुल्मुकं तु न वेसदा॥६८॥प्रषात
कप्रेक्षणे यो न वस्य ह विषस्तथा॥शिष्टस्य प्राशने मंत्रस्तत्रस
र्वंधिकारिणः॥६९॥ब्राह्मणानामसान्निध्ये स्वयमेव प्रषात
ये कं॥अवेक्षेद्द विःषशेषं न वयङ्क्षेपि भक्षयेत॥७०॥सफला
बदरी शाखा फलवत्यभिधीयते॥घनाविस्तिकताशंकाः
स्मृता ज्ञाताशिलास्कृताः॥७१॥न ष्टोदिन ष्टो मणिकःशिला
नाशे तथैव च॥तदेवाङ्कृत्य स०स्कार्य निापेक्षे दाग्रहायणी॥
॥७२॥अवणे कर्मलुप्तं चेत्कथंचित्सूतकादिना॥आग्रहा
यणिकं कुर्याद्बलिवर्ज्जमशेषतः॥७३॥ऊर्द्ध०स्वस्तरशा

यी स्यान्मासमर्द्धमथापि वा॥ सप्तरात्रं त्रिरात्रं वैकां वा सद्य एव वा॥ बा॰
॥७४॥ नोर्द्ध्वं मंत्रयोगः स्यान्नाम्न्यागारे नियम्यते॥ नाहतास्तर
णं चैव न पार्श्वं चापि दक्षिणं॥७५॥ दृढश्चेदाग्रहायण्यामावृ
त्तावपि कर्मणः॥ कुंभो मंत्रवदा सिंचेत्प्रतिकुंभमृचं पठेत्॥७ ६॥
चैत्यानां यो विधातस्यास बाधो बहुभिः स्मृतः॥ प्राणसं
मित इत्यादि वासिष्ठं बाधितं यथा॥७७॥ विरोधो यत्र वाक्या
नां प्रामाण्यं तत्र भूयसां॥ तुल्यप्रमाणकत्वे तु न्याय एव प्रकी
र्त्तितः॥७८॥ त्रैयंबकं करतलमष्टपामंडका स्मृता॥ पाला
शा गोलकाश्चैव लोहचूर्णं तु चीवरं॥७९॥ स्पृशन्ननामिका २९
तेय हस्त्व

त्र
णेण क्वचिदालोकयन्नपि॥ अनुमंत्रणीय॰ सर्वत्र सदैवमनुमं
त्रयेत्॥८०॥९॥ श्री॥ ज्वालनं दर्भकूर्चेन सर्वत्र स्रोतसां पशोः॥
दृष्टिं मिछाक मेण स्याद्दपार्थे पार्णिदारुणी॥८१॥ सप्तता वन्नृ
ह्न्यानि तथा स्तनचतुष्टयं॥ नाभिः श्रोणिरपानं च गोः स्रोतांसि
सि चतुर्दश॥८२॥ हृगेमा॰ सा वदानार्थं छिन्ना॰ स्विष्टकृदावृ
ता॥ वपामादाय जुहुयात् तंत्रमंत्रं समापयेत्॥८३॥ हृज्जिह्वा
क्रोडसक्थीनि सस्नेहं क्लोमगुद॰ स्तना॥ श्रोणिः स्कंध सदा पार्श्वे
पश्वंगानि प्रचक्षते॥८४॥ एकादशानामंगानामां वदानानि स
प्तया॥ पार्श्वस्य वृक्कसक्थोश्च द्विर्वादाङ्गश्च चतुर्दश॥८५॥ चति

ताः
साग्निश्रुतिः कार्या यस्मादप्यनुकल्पयेत्॥ अतोष्टक्येनि होमस्या
छागपक्षे च रावपि॥८६॥ अवदानानि यावंति क्रियेरन्नस्तरेप
शोः॥ तावतः पायसान् पिंडान् पश्वभावेपि कारयेत्॥८७॥ उद
नं व्यंजनार्थं तु पश्वभावेपि पायसं॥ सद्यः श्रपयेत्तद्दन्व
ष्टक्येपि कर्मणि॥८८॥ प्राधान्यं पिंडदानस्य केचिदाहुर्मनीषि स्य
मात्र णः॥ गयादौ पिंडदानस्य दीयमानं निदर्शनात्॥८९॥ भोज
नस्य प्रधानत्वं वदंत्यन्ये महर्षयः॥ ब्राह्मणानां परीक्षायां म
हा यत्न प्रदर्शनात्॥९०॥ आमश्राद्धविधानस्य विनापि ८०
डैः क्रियाविधिः॥ तदाल्लभ्याच्च न ध्यायविधानश्रवणादपि॥

॥९१॥ विद्वन्मतानुपादाय ममैवेतद्धृदि स्थितं॥ प्राधान्यमुभयोर्य
स्मात्तस्मादेष समुच्चयः॥९२॥ प्राचीनावीतिना कार्यं पित्र्येषु प्रोक्ष
णं पशोः॥ दक्षिणोद्वासनांतं च चरोर्न्निर्वपणादिकं॥९३॥ संनय
श्चावदानानां प्रधानार्थेन हीतरः॥ प्रधानं हवनं चैव शेषं प्रक्ष
ति वह्निवेत्॥९४॥ द्वीपमुन्नतमाख्यातं शादाश्चैवेष्टकास्मृताः
स ॥ किल्नं नज्ञालं प्रोक्तं दूरखातोदकामरुः॥९५॥ द्वारगवाक्ष
स्तंभैः कर्दमभित्त्यंतकोणं वधेश्च॥ नेष्टं वा सुद्वारं विद्रुमनाकां
तमार्गेश्च॥९६॥ वंशांगमावितिवीही छंखश्रुतियवांशस्तथा॥ अ हिः सं
सावित्यत्र नाम्नो कुर्याज्जुहुयात् क्षिप्रहोमवत्॥९७॥ साहृतं सुमनो

Indira Gandhi National
Centre for the Arts

युक्तमुदकंदधिसंयुतं॥अर्घ्यंदधिमधुभ्यांचमधुपर्कोभिधीयते॥
॥९८॥कांस्येनैवार्द्धलीवस्यानिनयेदर्घ्यमंडलौ॥कांस्यापि
धानंकांस्यस्थंमधुपर्कंसमर्पयेत॥९९॥श्री॥१॥इति
कर्मप्रदीपेतृतीयःप्रपाठकःसमाप्तः॥ ॥छ॥ ॥त्रवाडी
गांगजीसुतदेवरामतथारघुरामपठनार्थं॥ ॥शुभंभवतु॥



Indira Gandhi National Centre for the Arts